# Vishvamitraproktam Skanda Ashtottarashata Nama Stotram

# विश्वामित्रप्रोक्तं स्कन्दाष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Vishvamitraproktam Skanda Ashtottarashata Nama Stotram

File name : vishvAmitraproktaMskandAShTottarashatanAmastotram.itx

Category : subrahmanya, skandapurANa, aShTottarashatanAma, stotra

Location : doc_subrahmanya

Proofread by : PSA Easwaran

Description/comments : skandapurANa | mAheshvarakhaNDa | kaumArikAkhaNDa | adhyAya 29/123-145||

Latest update : April 27, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 27, 2025

*sanskritdocuments.org*

# विश्वामित्रप्रोक्तं स्कन्दाष्टोत्तरशतनामस्तोत्रम्

विश्वामित्रस्तु भगवान्कुमारं शरणं गतः ।
स्तवं दिव्यं सम्प्रचक्रे महासेनस्य चापि सः ॥ १२३॥

अष्टोत्तरशतं नाम्नां श्रृणु त्वं तानि फाल्गुन ।
जपेन येषां पापानि यान्ति ज्ञानमवाप्नुयात् ॥ १२४॥

ॐ त्वं ब्रह्मवादी त्वं ब्रह्मा ब्राह्मणवत्सलः ।
ब्रह्मण्यो ब्रह्मदेवश्च ब्रह्मदो ब्रह्मसङ्ग्रहः ॥ १२५॥

त्वं परं परमं तेजो मङ्गलानां च मङ्गलम् ।
अप्रमेयगुणश्चैव मन्त्राणां मन्त्रगो भवान् ॥ १२६॥

त्वं सावित्रीमयो देव सर्वत्रैवापराजितः ।
मन्त्र शर्वात्मको देवः षडक्षरवतां वरः ॥ १२७॥

माली मौली पताकी च जटी मुण्डी शिखण्ड्यपि ।
कुण्डली लाङ्गली बालः कुमारः प्रवरो वरः ॥ १२८॥

गवाम्पुत्रः सुरारिघ्नः सम्भवो भवभावनः ।
पिनाकी शत्रुहा श्वेतो गूढः स्कन्दः कराग्रणीः ॥ १२९॥

द्वादशो भूर्भुवो भावी भुवः पुत्रो नमस्कृतः ।
नागराजः सुधर्मात्मा नाकपृष्ठः सनातनः ॥ १३०॥

त्वं भर्ता सर्वभूतात्मा त्वं त्राता त्वं सुखावहः ।
शरदक्षः शिखी जेता षड्वक्त्रो भयनाशनः ॥ १३१॥

हेमगर्भो महागर्भो जयश्च विजयेश्वरः ।
त्वं कर्ता त्वं विधाता च नित्यो नित्यारिमर्दनः ॥ १३२॥

महासेनो महातेज वीरसेनश्च भूपतिः ।
सिद्धासनः सुराध्यक्षो भीमसेनो निरामयः ॥ १३३॥

शौरिर्यदुर्महातेजा वीर्यवान्सत्यविक्रमः ।
तेजोगर्भोऽसुररिपुः सुरमूर्तिः सुरोर्जितः ॥ १३४॥

कृतज्ञो वरदः सत्यः शरण्यः साधुवत्सलः ।
सुव्रतः सूर्यसङ्काशो वह्निगर्भः कणो भुवः ॥ १३५॥

पिप्पली शीघ्रगो रौद्री गाङ्गेयो रिपुदारणः ।
कार्त्तिकेयः प्रभुः क्षन्ता नीलदंष्ट्रो महामनाः ॥ १३६॥

निग्रहो निग्रहाणां च नेता त्वं सुरनन्दनः ।
प्रग्रहः परमानन्दः क्रोधघ्नस्तार उच्छ्रितः ॥ १३७॥

कुक्कुटी बहुली दिव्यः कामदो भूरिवर्धनः ।
अमोघोऽमृतदो ह्यग्निः शत्रुघ्नः सर्वमोदनः ॥ १३८॥

अव्ययो ह्यमरः श्रीमानुन्नतो ह्यग्निसम्भवः ।
पिशाचराजः सूर्याभः शिवात्मा शिवनन्दनः ॥ १३९॥

अपारपारो दुर्ज्ञेयः सर्वभूतहिते रतः ।
अग्राह्यः कारणं कर्ता परमेष्ठी परं पदम् ॥ १४०॥

अचिन्त्यः सर्वभूतात्मा सर्वात्मा त्वं सनातनः ।
एवं स सर्वभूतानां संस्तुतः परमेश्वरः ॥ १४१॥

नाम्नामष्टशतेनायं विश्वामित्रमहर्षिणा ।
प्रसन्नमूर्तिराहेदं मुनीन्द्रं व्रियतामिति ॥ १४२॥

मम त्वया द्विजश्रेष्ठ स्तुतिरेषा निरूपिता ।
भविष्यति मनोऽभीष्टप्राप्तये प्राणिनां भुवि ॥ १४३॥

विवर्धते कुले लक्ष्मीस्तस्य यः प्रपठेदिमम् ।
न राक्षसाः पिशाचा वा न भूतानि न चापदः ॥ १४४॥

विघ्नकारीणि तद्गेहे यत्रैव संस्तुवन्ति माम् ।
दुःस्वप्नं च न पश्येत्स बद्धो मुच्यते बन्धनात् ॥ १४५॥

स्तवस्यास्य प्रभावेण दिव्यभावः पुमान्भवेत् ॥

इति श्रीस्कन्दपुराणे माहेश्वरखण्डे, कौमारिकाखण्डे,
एकोनत्रिंशाध्यायान्तर्गतं विश्मित्रप्रोक्तं स्कन्दाष्टोत्तर-
शतनामस्तोत्रं समाप्तम् ।

स्कन्दपुराण । माहेश्वरखण्ड । कौमारिकाखण्ड । अध्याय २९/१२३-१४५॥

skandapurANa . mAheshvarakhaNDa . kaumArikAkhaNDa . adhyAya 29/123-145..

Proofread by PSA Easwaran

---

*Vishvamitraproktam Skanda Ashtottarashata Nama Stotram*

pdf was typeset on April 27, 2025

Please send corrections to *sanskrit@cheerful.com*